श्रीसुरसरस्वतीसभा, शृङ्गेरि

तुरीया परीक्षा

प्रथमपत्रिका

अङ्काः - 100

दिनाङ्कः -27-01-2019

समयः – घण्टात्रयम्

पूर्वाह्णे – 10:00 वादनतः 1:00 वादनपर्यन्तम्

सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि

1. पञ्चानां एकवाक्येन उत्तरं लिखत । 5

१. नलः कः ?

२. देवेन्द्रस्य सारथिः कः ?

३. दुर्योधनस्य मातुलः कः ?

४. गुरुवंशकाव्यं केन रचितम् ?

५. कुशाग्रबुद्धिः कः ?

६. पुत्रः कः ?

७. नैष्कर्म्यसिद्धिः नाम ग्रन्थः केन रचितः ?

८. हनुमान् कदा लङ्कां प्रविष्टः ?

2. पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत । 10

१. शङ्करः इति नाम कथं सार्थकमासीत् ?

२. सहस्रानीकः कः ? तं देवेन्द्रः किमुवाच ?

३. अम्बरस्थः चन्द्रः कथं बभ्राज ?

४. एकचक्रनगरे वसतः पाण्डवान् यदृच्छयाऽऽगतो विप्रः किमुवाच ?

५. इन्द्राग्नियमवरुणैः नलाय के के वराः दत्ताः ?

६. भगवतः प्रकृतित्वं पुरुषत्वं च कथम् ?

७. वित्तस्य गतयः काः? तृतीया गतिः कस्य भवति ?

3. द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत । 8

१. रघोरौदार्यं विशदयत।

२. गिरिः गुरुसेवां कथं विदधौ ?

३. हस्तिनापुरमागतान् पाण्डवान् दृष्ट्वा नागराः किमतर्कयन् ?

४. स्वयंवरार्थमागच्छन्तं नलं दृष्ट्वा देवाः किमवोचन् ?

Scanned by CamScanner

4. वाक्यत्रयं सप्रसङ्गं विवृणुत । 9

१. " प्रत्यपद्यत च सद्य एव यौवनम् " २. " विशिष्टयोस्सम्बन्धो हि गुणवान् भवति "

३. " मयि घोषवती नाम वीणाऽस्ति "

४. " भगवन्नस्ति मे भवतः सूत्रभाष्यस्य वार्तिककरणाभिलाषः "

5. द्वयोः भावं विशदयत । 8

१. यस्य चेतसि वर्तेथाः स तावत्कृतिनां वरः ।
किं पुनर्ब्रह्मयोनेर्यः तव चेतसि वर्तते ॥

२. जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिस्स्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥

३. भर्ता पुंसवनमथो शुभोऽह्नि चक्रे सीमन्तं स शिवगुरुर्मुदा विधिज्ञः ।
गर्भः सोऽप्यथ ववृधे तदीयचेतो हर्षेण प्रतिदिवसं सरोरुहाक्ष्याः ॥

४. लोकस्य पापानि विनाशयन्तं महोदधिं चापि समेधयन्तम् ।
भूतानि सर्वाणि विराजयन्तं ददर्श शीतांशुमथाभियान्तम् ॥

6. श्लोकं पूर्णं लिखत । 4

१. प्रारभ्यते ____________________ परित्यजन्ति ।

२. आयुर्वर्षशतं नृणां ______________ प्राणिनाम् ।

7. एकस्य कवेः देश-काल-कृति-महत्त्वादीनां विषये लिखत । 4

१. लक्ष्मणसूरिः २. कालिदासः

8. एकस्य लघुटिप्पणीं लिखत । 4

१. एकचक्रनगरम् २. उदयनः

Scanned by CamScanner

9. चत्वारि पदानि वाक्ये योजयत । 4

१. अधीयानाः    २. आरात्    ३. प्रभृति

४. ददामि    ५. प्रसार्य

10. चतुर्णां रूपाणि विवेचयत । 4

१. अपृच्छत्    २. कवची    ३. जज्ञे

४. पाराशर्यः    ५. कुतूहलितः

11. चतुर्णां पर्यायपदानि लिखत । 4

१. सङ्कर्षणः    २. भीष्मः    ३. ओघः    ४. विचक्षणः    ५. अजिनम्

12. चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत । 4

१. वर्त्मान्तरम्    २. सर्वलक्षणसम्पन्नः    ३ वाक्कलहः

४. महाराजः    ५. विनष्टशीताम्बुतुषारपङ्कः    ६. चक्रपाणिः

13. चतुर्णां सन्धिं विभज्य नाम लिखत । 4

१. स्त्रीभिस्सह    २. तच्छ्रुत्वा    ३. अधीयन्नर्जुनः

४. वागीशः    ५. सोऽयम्

14. द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत । 6

१. ददर्श    २. भाति    ३.रोचते    ४. चक्रे

15. द्वयोः व्याकरणविशेषं लिखत । 4

१. व्यजयत    २. आस्ते स्म    ३. मा शुचः

Scanned by CamScanner

16. समासमेकं सलक्ष्णं विशदयत । 4

१. द्वन्द्व - समासः २. कर्मधारय-समासः

17. चतुर्थं पदं लिखत । 4

| | | | | | |
|---|---|---|---|---|---|
| १. चक्रपाणिः | :: | विष्णुः | :: | त्रिशूलपाणिः | ______ |
| २. गाङ्गेयः | :: | भीष्मः | :: | हैडिम्बेयः | ______ |
| ३. श्रृङ्गेरीवासः | :: | कृष्णशास्त्री | :: | उदयनचरितम् | ______ |
| ४. विष्णुस्तुतिः | :: | रघुवंशः | :: | शिवस्तुतिः | ______ |

18. इतरवचनानि लिखत । 4

१. ______ ______ पेतुः ।

२. सर्वः ______ ______ ।

३. राज्ञा ______ ______ ।

४. दुर्वासाः ______ ______ ।

19. रिक्तस्थानानि पूरयत । 4

१. पुत्रमात्मनः इच्छति ______ ।

२. महारणं प्राप्य यथा ______ ।

३. भवन्ति नम्राः ______ फलोद्गमैः ।

४. विद्याविहीनः ______ ।

20. प्रयोगपरिवर्तनं कुरुत । 2

१. तेन देवेन आदिष्टः ।

२. हिडिम्बा भ्रात्रा प्रेषिता ।

Scanned by CamScanner

# श्रीसुरसरस्वतीसभा, श्रृङ्गेरि

## तुरीया परीक्षा

## द्वितीयपत्रिका

अङ्काः - 50

दिनाङ्कः 27-01-2019

समयः – सार्धैकहोरा

पूर्वाह्णे –1:30 तः 3:00 पर्यन्तम्

<u>सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि</u>

1. विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत । 5

   १. परिसरः    २. शङ्कराचार्यः    ३. शिवाजी

2. (अ) दशलकाराः के ? कस्मिन् काले,अर्थे च तेषाम् उपयोगः भवति । सोदाहरणं स्पष्टीकुरुत। 4

   (आ) द्वितीया विभक्तिः कदा भवति । सोदाहरणं विवृणत । 4

3. (अ) व्याजस्तुत्यलङ्कारं सोदाहरणं सलक्षणं विशदयत । 4

   (आ)" प्रियेषु सौभाग्यफला हि चारुता " अत्रत्यं वृत्तं सलक्षणं सप्रस्तारं च निरूपयत । 4

4. उत्तरं लिखत । (त्रयाणामेव) 3

   १. अर्धविरामचिह्नं कदा उपयुज्यते ? सोदाहरणं लिखत ।

   २. आदिमध्यावसानेषु के लाघवं यान्ति ?

   ३. 'स्वाहा' इति अव्ययस्य योगे का विभक्तिः प्रयुज्यते ?

   ४. अभिधा नाम का ?

5. द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत । 6

   १. अभूत्    २.कर्ता    ३. भूयात्    ४. अवधिष्ट

6. प्रयोगपरिवर्तनं कुरुत । 4

   १. बालाःहसन्ति।    ३. सः मां पश्यति ।

   २. तेन उपविश्यते।    ४. कृष्णेन नर्तितम् ।

Scanned by CamScanner

7. वाक्यदोषं परिहरत । 4

१. नगरस्य बहिः उपवनं वर्तते ।

२. कुण्डलेन हिरण्यम् ।

३. व्याघ्रेन त्रस्यति ।

४. शिष्यः गुरुणा अधीते ।

8. टिप्पणीं लिखत । (एकस्य) 2

१. निर्धारणा षष्ठी/सप्तमी ।

२. भावे प्रयोगः

.9 मातृभाषया अनूद्यत । 5

१. रामः गोषु दुह्यमानासु गतः ।

२. वृक्षाणां नारिकेलः बहूपयुज्यते ।

३. यदि लक्ष्मणः आगमिष्यत, तदा रावणः सीतामपहर्तुं नाशक्ष्यत् ।

४. इमाः स्त्रियः श्वः प्रातर्नदीं गन्तारः, तत्र स्नातारश्च ।

५. श्रुतं मया यत्त्वं वाराणसीं ययाथ ।

10. संस्कृतभाषया परिवर्तयत । 5

१. ಬೆಂಕಿ ಉರಿದಿದ್ದರೆ ಅಡಿಗೆಯನ್ನು ಮಾಡುತ್ತಿದ್ದಳು.

If the fire would have been set ablaze, she would have cooked.

२. ಹನುಮಂತನು ಲಂಕೆಯನ್ನು ಪ್ರವೇಶಿಸಿದನು. Hanuman entered Lanka.

३. ಅವಳು ಭಾರತೀಯ ಸಂಸ್ಕೃತಿಯನ್ನು ಕುರಿತು ಸಭೆಯಲ್ಲಿ ಮಾತಾಡುವಳು.

She will speak about Indian Culture in the Sabha (assembly).

४. ದೇವತೆಗಳಲ್ಲಿ ನಾನು ಸರಸ್ವತಿಯನ್ನು ಪೂಜಿಸುತ್ತೇನೆ.

Among the goddesses, I worship Saraswathi.

५. ಅವರು ದೇವರನ್ನು ಭಜಿಸಲಿ. Let them pray God.

Scanned by CamScanner